"पश्चात्तिग्मप्रसमाश्रितो रतिपतिर्देवस्य रत्योत्पले ।
विभ्रत्या समसेवत धनुरिषून् पौष्यान् वहन् पञ्च च ॥")

देशविशेषस्थस्त्रीणां स्थानविशेषे तस्याविर्भावो यथा,—
"वाचि श्रीमाथुरीणां जनकजनपदस्थायिनीनां कटाक्षे
दन्ते गौडाङ्गनानां सललितजघने चोत्कलप्रेयसीनाम् ।
तैलङ्गीनां नितम्बे सजलघनरुचौ केरलीकेशपाशे
कार्णाटीनां कटौ च स्फुरति रतिपतिर्गुर्जरीणां स्तनेषु ॥"
इति साहित्यदर्पणम् ॥

रतिपाशकः, पुं, (रतेः पाश इव । ततः स्वार्थे कन् ।) रतिबन्धविशेषः । यथा,—
"पीड़येदूरुयुग्मेन कामुको यदि सुन्दरीम् ।
रतिपाशस्तथाख्यातः कामिनीनां सुखावहः ॥"
इति स्मरदीपिका ॥

रतिप्रियः, पुं, ( रतेः प्रियः । ) कामदेवः । इति शब्दरत्नावली ॥ सुरतप्रियश्च ॥ ( स्त्री, शक्तिविशेषः । यथा, देवीभागवते । ७ । ३० । ६८ ।
"गोदावर्य्यां त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया ॥" )

रतिमदा, स्त्री, ( रतेर्मदोऽस्याः । ) अप्सराः । यथा,—
"सर्व्वानन्दा रतिमदाप्सरसः सुमदात्मजा ॥"
इति त्रिकाण्डशेषः ॥

रतिमन्दिरं, क्ली, ( रतेर्मन्दिरमिव । ) योनिः । इति जटाधरः ॥ मैथुनगृहम् । यथा,—
"सञ्चारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतं
चेतः कान्तसमीहितावधि पदन्यासावधि प्रेक्षितम् ।
हास्यं चाधरपल्लवावधि महामानोऽपि मौनावधिः
सर्व्वं सावधि नावधिः कुलभुवां प्रेम्णः परं केवलम् ॥"
इति रसमञ्जरी ॥

रतिमित्रः, पुं, ( रतौ मित्रः सूर्य्य इव । ) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"पातयेदूरुयुग्मे च कामुकं यदि कामुकी ।
रतिमित्रस्तदाख्यातः कामिनीनां सुखावहः ॥"
इति रतिमञ्जरी ॥

रतिरमणः, पुं, (रत्या रमणः ।) कामदेवः । इति त्रिकाण्डशेषः ॥

रतिलक्षं, क्ली, (रतिं लक्षयतीति । लक्षि + अण् ।) निधुवनम् । इति हारावली । ५० ॥

रतिसत्वरा, स्त्री, ( रतौ सत्वरा । ) चिरञ्जीवा । इति शब्दचन्द्रिका ॥ पिड़िङ्ग शाक इति भाषा ॥

रतिसुन्दरः, पुं, ( रतौ सुन्दरः सुखावहः । ) रतिबन्धविशेषः । तस्य लक्षणं यथा,—
"नारीपदद्वयं कामी धारयेद्धृदये यदि ।
धृतकण्ठो रमेत् कामी बन्धः स्याद्रतिसुन्दरः ॥"
इति रतिमञ्जरी स्मरदीपिका च ॥

रतूः, स्त्री, ( ऋतीयते इति । स्पर्द्धार्थक ऋत्सौत्रधातुः + "ऋतेरम् च ।" उणा० १ । ६४ । इति कूः । अम् च । ) देवनदी । सत्यवाक् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रत्नोदवहः, पुं, (रत्नं उद्वहति प्रापयतीति । उत् + वह् + अच् । ) कोकिलः । इति शब्दमाला ॥

रत्नं, क्ली, ( रमयति हर्षयतीति । रम् + णिच् + "रमेस्त च ।" उणा० ३ । १४ । इति नः तकारश्चान्तादेशः ।) अश्मजातिः । मुक्तादि । तत्पर्य्यायः । मणिः २ । इत्यमरः ॥ ( यथा, कुमारे । ५ । ४५ ।
"न रत्नमन्विष्यति मृग्यते हि तत् ॥" )
स्वजातिश्रेष्ठः । इति मेदिनी ॥ ( यथा, मार्कण्डेये । ७५ । ४५ ।
"स्त्रीरत्नमतिचार्व्वङ्गी द्योतयन्ती दिशस्त्विषा ॥")
माणिक्यम् । वज्रम् । इति राजनिर्घण्टः ॥*॥
अथ रत्नोत्पत्तिकारणम् । यथा,—
सूत उवाच ।
"वक्ष्यामि परीक्षां रत्नानां बलो नामासुरोऽभवत् ।
इन्द्राद्या निर्ज्जितास्तेन निर्जेतुं तैर्न शक्यते ॥
वरव्याजेन पशुतां याचितः स सुरैर्मखे ।
बलो ददौ स्वपशुतामतिसत्त्वो मखे हतः ॥
पशुवत्स विशेत् स्तम्भे स्ववाक्यपाशनियन्त्रितः ।
बलो लोकोपकाराय देवानां हितकाम्यया ॥
तस्य सत्त्वविशुद्धस्य सुविशुद्धेन कर्म्मणा ।
कायस्यावयवाः सर्व्वे रत्नबीजत्वमाययुः ॥
देवानामथ यक्षाणां सिद्धानां पवनाशिनाम् ।
रत्नबीजमयं ग्राहः सुमहानभवत्तदा ॥"*॥
अथ तस्याकरस्थानानि यथा,—
"तेषान्तु पततां वेगाद्विमानेन विहायसा ।
यद्यत् पपात रत्नानां बीजं क्वचन किञ्चन ॥
महोदधौ सरिति वा पर्व्वते काननेऽपि वा ।
तत्तदाकरतां यातं स्थानमाधेयगौरवात् ॥
तेषु रक्षोविषव्यालव्याधिघ्नान्यघहानि च ।
प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च ॥
वज्रमुक्तामणयः सपद्मरागाः समरकताः प्रोक्ताः ।
अपि चेन्द्रनीलमणिवरवैदूर्य्याश्च पुष्परागाश्च ।
कर्केतनं सपुलकं रुधिराख्यसमन्वितं तथा स्फटिकम् ।
विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः ॥*॥
आकारवर्णौ प्रथमं गुणदोषौ तत्फलं परीक्षा च ।
मूल्यञ्च रत्नकुशलैर्व्विज्ञेयं सर्व्वशास्त्राणाम् ॥
कुलग्नेनूपजायन्ते यानि चोपहतेऽहनि ।
दोषैस्तान्यनुयुज्यन्ते हीयन्ते गुणसम्पदा ॥
परीक्षापरिशुद्धानां रत्नानां पृथिवीभुजा ।
धारणं संग्रहो वापि कार्य्यः श्रियमभीप्सता ॥
शास्त्रज्ञाः कुशलाश्चापि रत्नभाजः परीक्षकाः ।
त एव मूल्यमात्राया वेत्तारः परिकीर्त्तिताः ॥"
इति गारुड़े ६८ अध्यायः ॥
विशेषरत्नपरीक्षा तत्तच्छब्दे द्रष्टव्या ॥*॥ चतुर्द्दश महारत्नानि यथा । सर्व्वक्षोणिचरस्य तत्तनयः शशबिन्दुश्चतुर्द्दशमहारत्नश्चक्रवर्त्ताभवत् । चतुर्द्दश महान्ति रत्नानि यस्य सः । रत्नानि तु स्वजातिश्रेष्ठानि धर्म्मसंहितोक्तानि ।
"चक्रं रथो मणिः खड्गश्चर्म्म रत्नञ्च पञ्चमम् ।
केतुर्निधिश्च सप्तैवमप्राणानि प्रचक्षते ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्त कीर्त्तिताः ॥
चतुर्द्दशैतानि रत्नानि सर्व्वेषां चक्रवर्त्तिनामिति । इति विष्णुपुराणे ४ अंशे १२ अध्यायः तट्टीका च ॥ ( अथ रत्नस्य निरुक्तिः ।
"धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत् ।
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥"
अथ रत्नस्य नामानि स्वरूपनिरूपणञ्च । यथा,—
"रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ।
तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ॥"
अथ रत्नानां निरूपणम् ।
"रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।
रत्नं हीरा । गारुत्मतं पान्ना । माणिक्यं पद्मरागः । इन्द्रनीलः नीला ।
विष्णुधर्म्मोत्तरेऽपि नवरत्ननिरूपणम् ।
मुक्ताफलं हीरकञ्च वैदूर्य्यं पद्मरागकम् ।
पुष्परागञ्च गोमेदं नीलं गारुत्मतन्तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

रत्नकन्दलः, पुं, ( रत्नानां कन्दलो नवाङ्कुर इव । ) प्रवालम् । इति शब्दरत्नावली ॥

रत्नकूटः, पुं, ( रत्नमयः कूटो शृङ्गमस्य । ) पर्व्वतविशेषः । इति शब्दरत्नावली ॥ ( क्ली, द्वीपविशेषः । यथा, कथासरित्सागरे । २६ । २ ।
"अस्ति द्वीपवरं मध्ये रत्नकूटाख्यमम्बुधेः ।
तत्प्रतिष्ठश्च भगवान् हरिरब्धिना ॥")

रत्नगर्भः, पुं, ( रत्नानि गर्भे तत्स्थाने अधिकारेऽस्य ।) कुवेरः । इति त्रिकाण्डशेषः ॥ (रत्नानि गर्भेऽस्य । ) समुद्रः । इति राजनिर्घण्टः ॥

रत्नगर्भा, स्त्री, ( रत्नानि गर्भे मध्येऽस्याः । ) पृथिवी । इति हेमचन्द्रः । ४ । ३ ॥ उपचारात् गुणवत्पुत्रवती च ।

रत्नद्वीपं, क्ली, (रत्ननिर्म्मितं द्वीपम् । शाकपार्थिववत् समासः । ) रत्ननिर्म्मितस्थानम् । यथा,—
"सिंहस्कन्धाधिसंरूढ़ां नानालङ्कारभूषिताम् ।
चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीम् ॥
शङ्खचक्रधनुर्ब्बाणलोचनत्रितयान्विताम् ।
रक्तवस्त्रपरीधानां बालार्कसदृशीतनूम् ॥